दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णत्रयोदशी
भाद्रपद 24 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-9 ■ वर्ष-5 ■ अङ्क-320 | 1 | सितम्बर 09, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 राष्ट्रियराजधान्याः सत्यनिकेतन-क्षेत्रे भवन-पतनेन मृतानां सङ्ख्या संवर्ध्य सप्त यावत् उपगता वर्तते

4 उद्घाटन-शिलान्यासयोः सांसदानां विधायकानां च आमन्त्रणम् अनिवार्यम्; पीएमजीएसवाई-कार्याणि सन्दर्भे केन्द्रस्य राज्येभ्यः कठोर-निर्देशाः

9 संस्कृताश्रिता, संस्कृतमयी 'कः भवति बृहस्पतिः?' इति प्रतियोगिता आयोजिता

# प्रधानमन्त्रिणा नरेन्द्रमोदिना गुजरातस्य वडोदरायां पञ्चत्रिंशत्सहस्र-कोटिरूप्यतोप्यधिकमूल्यानां विभिन्नविकासपरियोजनानाम् उद्घाटनं शिलान्यासः च कृतः



प्रधानमन्त्रिणा नरेन्द्रमोदिना गुजरातस्य वडोदरायां पञ्चत्रिंशत्सहस्र-कोटिरूप्यतोप्यधिकमूल्यानां विभिन्नविकासपरियोजनानाम् उद्घाटनं शिलान्यासः च कृतः। प्रधानमन्त्रिणा पश्चिम-समर्पित-मालवाहक-मार्गस्य त्रयः प्रमुखाः खण्डाः राष्ट्राय समर्पिताः, येन मालवाहक मार्गजालस्य पूर्ण परिचालनं सम्भविष्यति। प्रधानमन्त्री मोदी न्यू-साणन्द, न्यू-मकरपुरा, न्यू उम्बरगाँव् तथा न्यू-जेएनपीटी इत्येतेभ्यः स्थलेभ्यः मालवाहक रेलयानसेवानां हरितध्वजं प्रदर्श्य शुभारम्भं कृतवान्। तेन टाण्डा-मार्गस्य वडोदरायाः च मध्ये नवीनयात्रि-रेलसेवायाः शुभारम्भः अपि कृतः। एषा सेवा अलीराजपुरस्य दूरस्थेषु जनजातीयक्षेत्रेषु राष्ट्रीय-रेल-जालस्य सम्पर्कं स्थापयिष्यति।

## भारतं वैश्विकोत्पादन-केन्द्ररूपेण उदितम् अस्ति - प्रधानमन्त्री

विशालं जनसमूहं सम्बोधयन् प्रधानमन्त्री उक्तवान् यत् भारतं वैश्विकोत्पादन केन्द्ररूपेण उदितम् अस्ति तथा अधुना देशः स्वयमेव उन्नतयोः रेल-मेट्रो चेत्येतयोः यानयोः कक्षनिर्माणं करोति । प्रधानमन्त्री उक्तवान् यत् अस्याः परियोजनायाः परिकल्पना षडधिकद्विसहस्रतमे वर्षे कृता आसीत्, किन्तु सा बहूनि वर्षाणि निष्क्रियावस्थायाम् आसीत्। तद्विपरीतं गतदशके द्रुतगतिना कृतस्य कार्यान्वयनस्य फलस्वरूपं राष्ट्रियापूर्ति-व्यवस्था पूर्णतया परिवर्तिता अस्ति। अद्य अयं मालवाहक-मार्गः द्रुतगत्या विकासमानस्य भारतस्य जीवनरेखारूपेण कार्यं करोति । प्रधानमन्त्रिणा उक्तं यत् मालवाहनस्य यात्रि-रेलमार्गेभ्यः पृथक्करणेन कार्यक्षमतायां महत्त्वपूर्णः परिष्कारः अभवत्। यात्राकाले महन्यूनतया इन्धनस्य पर्याप्तं संरक्षणं भवति, पर्यावरणे दुष्प्रभावः न्यूनीभवति, सम्पूर्णराष्ट्राय च द्रुततरा स्वच्छा च आपूर्तिव्यवस्था स्थापिता भवति। कार्यक्रमावधौ प्रधानमन्त्री मोदी सप्तनवतिशतकोटि-रूप्यतोप्यधिकमूल्यानां त्रयाणां रेलविस्तार-परियोजनानां शिलान्यासमपि कृतवान्।

## प्रधानमन्त्री ग्लोबल-फिनटेक्-फेस्ट् इत्यस्य उद्घाटनं कृतवान्

मुम्बय्यां प्रधानमन्त्री नरेन्द्रमोदी षड्विंशत्यधिक-द्विसहस्रतमस्य ग्लोबल-फिनटेक्-फेस्ट् इत्यस्य उद्घाटनं कृतवान् । अस्य वार्षिक-सम्मेलनस्य सप्तमं संस्करणं समारब्धं सत् आगामिनि सितम्बरमासस्य एकादश-दिनाङ्के समाप्तिमेष्यति।

# बॉम्बे-उच्चन्यायालयेन मानहानिप्रकरणे काङ्ग्रेस्-सांसदस्य राहुलगान्धिनः विरुद्धं प्रख्यापितस्य समाह्वानपत्रस्य निरस्तीकरणं निराकृतम्



बॉम्बे-उच्चन्यायालयेन प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति नवदशोत्तरद्वि-सहस्रतमे वर्षे प्रदत्तं वक्तव्यं सम्बद्धे मानहानिप्रकरणे काङ्ग्रेस्-सांसदस्य राहुलगान्धिनः विरुद्धं प्रख्यापितस्य समाह्वानपत्रस्य निरस्तीकरणं निराकृतम्। न्यायमूर्तिनः एन्. आर्. बोरकर् इत्यस्य एकलपीठेन राहुलगान्धिनः सा याचिका निरस्तीकृता, यस्यां तेन स्वविरुद्धं न्यायालयेन प्रारब्धस्य कार्याचरणस्य आदेशः आक्षिप्तः आसीत्। तथापि उच्चन्यायालयेन एकविंशत्युत्तर-द्विसहस्रतमे वर्षे प्रदत्तः स्वस्य सः निर्देशः यथावत् स्थापितः, यस्य अन्तर्गतं दण्डाधिकारिणः पुरतः श्रवणं षड्-सप्ताहं यावत् स्थगितम् आसीत्। अनेन राहुलगान्धी उच्चतमन्यायालयं प्रति गन्तुं अवसरं प्राप्स्यति। इदं प्रकरणम् अष्टादशाधिक-द्विसहस्रतमे वर्षे राफेल्-सन्धि-विषये राहुलगान्धिना प्रदत्ते वक्तव्यसम्बद्धे प्रस्तुत-मानहानि-याचिकायाम् आधारितम् अस्ति।

## अद्यतनीयं सुभाषितम्

**स्वाभाविकं तु यन्मित्रं भाग्यैनैवाऽभिजायते।**
**तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति।।**

भावार्थः- ऐसा व्यक्ति जो स्वभाव से ही तुम्हारा परम मित्र हो बड़े भाग्य से मिलता है क्यों कि उसकी तुम्हारे प्रति मित्रता और प्रेम कृत्रिम नहीं होते और विपत्ति और बुरे समय में भी वह अपनी मित्रता को नहीं त्यागता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा




# दिल्ली-उच्च-न्यायालयेन दिल्ली-विश्वविद्यालयस्य सर्वेषु महाविद्यालयेषु छात्रावास-सौविध्यस्य व्यवस्थापनार्थं समुपस्थापितायाः जनहित-याचिकायाः तात्कालिक-वादश्रवणस्य अभ्यर्थना प्रत्याख्याता

दिल्ली-उच्च-न्यायालयेन दिल्ली-विश्वविद्यालयस्य सर्वेषु महाविद्यालयेषु छात्रावास-सौविध्यस्य व्यवस्थापनार्थं समुपस्थापितायाः जनहित-याचिकायाः तात्कालिक-वादश्रवणस्य अभ्यर्थना प्रत्याख्याता । न्यायालयेन संशयः प्रकटितः यत् किं प्राथमिक दृष्ट्या अथ अन्तर्वर्ति-काले एतादृशः निर्देशः दातुं शक्यते? न्यायालयः प्रत्यवोचत् यत् याचिकाकर्तृभिः एषा याचिका स्वतः-सूचीकरण-प्रक्रियायै उपस्थापनीया। अवधेयमिदं यत् दिल्ली-विश्वविद्यालयस्य दक्षिण-परिसरस्य निकटे सत्यनिकेतन-क्षेत्रे एकस्य वास-भवनस्य पतनेन सप्तजनानां निधनानन्तरम् एषा याचिका न्यायालये समुत्थापिता आसीत्।

# प्रधानमन्त्रिणा नवसारी इत्यत्र नवनिर्मितस्य भाजपाकार्यालयस्य उद्घाटनं कृतम्



प्रधानमन्त्री नरेन्द्रमोदी सामाजिकसेवां स्वच्छतां च प्रभावि-दैनन्दिन-आचरणरूपेण स्वीकर्तुम् अथ विकासयोजनानां लाभं समाजस्य प्रति प्रापयितुं च नागरिकेभ्यः जनप्रतिनिधिभ्यश्च आह्वानं कृतवान्। प्रधानमन्त्रिणा नवसारी इत्यत्र नवनिर्मितस्य भाजपाकार्यालयस्य उद्घाटनानन्तरम् आयोजिता विशालजनसभा सम्बोधिता । प्रधानमन्त्री-स्वनिधियोजनायाः परिवर्तनकारिप्रभावस्य उल्लेखं कुर्वन् प्रधानमन्त्री उक्तवान् यत् अनया योजनया लघुमार्गविक्रेतृभ्यः पथविक्रेतृभ्यश्च सुलभऋणस्य अथ आधुनिक अङ्कीय देयसौविध्यानां च सुलभप्राप्तिं सुनिश्चित्य वित्तीयसमावेशनं प्रवर्धितम्। जनस्वास्थ्यस्य स्वच्छतायाश्च महत्त्वं प्रतिपादयन् प्रधानमन्त्री स्वागमनात् पूर्वं स्थानीयप्रशासनेन निवासिभिश्च सञ्चालितस्य व्यापकस्य सूक्ष्मस्वच्छताभियानस्य प्रशंसां कृतवान्। प्रधानमन्त्री मोदी जनकल्याणाय निरन्तरसमर्पणस्य कृते दलकार्यकर्तॄणामपि प्रशंसां कृतवान्।

## डॉ. भूपेन हजारिका-महोदयाय तस्य शततमे जन्म-जयन्त्यवसरे प्रधानमन्त्री , उपराष्ट्रपतिः, रक्षामन्त्रीश्च स्वकीयां भावपूर्णां श्रद्धाञ्जलिं समार्पयन्

असम-विधानसभायाः भूतपूर्व-सदस्याय विश्रुत-सङ्गीतज्ञाय भारतरत्नविभूषिताय डॉ. भूपेन हजारिका-महोदयाय तस्य शततमे जन्म-जयन्त्यवसरे प्रधानमन्त्री नरेन्द्रमोदी, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, रक्षामन्त्री राजनाथ सिंहः, गृहमन्त्री अमित शाहश्च स्वकीयां भावपूर्णां श्रद्धाञ्जलिं समार्पयन्। साम्प्रदायिक-सञ्चार-पटलीयसन्देशे प्रधानमन्त्रिणा श्रीमोदिना प्रत्यपादि यत् डॉ. हजारिका-महोदयस्य स्वर-माधुरी असम-प्रदेशस्य आत्मानं, पूर्वोत्तर भारतस्य च सांस्कृतिक-चैतन्यं समग्र राष्ट्र प्रासारयत्। अपरस्मिन् सन्देशे उपराष्ट्रपतिना राधाकृष्णन् इत्यमुना न्यरूप्यत यत् स्वीयेन आत्म-स्पर्शिना सङ्गीतेन, ओजस्विभिः शब्दैश्च डॉ. हजारिका असमस्य, पूर्वोत्तर भारतस्य, अथ च विशाल-मानव-संवेदनानां जीवन्तरूपं सङ्गीत-बद्ध्म् अकरोत्।



# रक्षामन्त्री राजनाथसिंहः त्रिदिवसीय-श्रीलङ्कायात्रायै कोलम्बोनगरं सम्प्राप्तवान्

रक्षामन्त्री राजनाथसिंहः त्रिदिवसीय श्रीलङ्कायात्रायै कोलम्बोनगरं सम्प्राप्तवान्। तस्य यात्रा भारत-श्रीलङ्कयोः मध्ये द्विपक्षीयरक्षासहकारस्य सामुद्रिकसहकारस्य च सुदृढीकरणोद्देश्येन आयोजिता अस्ति। श्रीलङ्कायाः बण्डारनायके-अन्ताराष्ट्रिय विमानस्थानके श्रीसिंहस्य श्रीलङ्कायाः उपरक्षामन्त्री अरुणा जयशेखरः श्रीलङ्कायां भारतस्य उच्चायुक्तः सन्तोष झाः च हार्द स्वागतं कृतवन्तौ। स्वयात्रावधौ रक्षामन्त्री श्रीलङ्कायाः नेतृत्वेन सह विविधेषु विषयेषु वार्ता करिष्यति। अस्याः वार्तायाः उद्देश्यं परस्परहितसम्बद्धेषु क्षेत्रेषु द्विपक्षीयसम्बन्धानां सुदृढीकरणम् अस्ति। सः कोलम्बोनगरे भारतीयप्रवासि-समुदायस्य सदस्यैः सह संवादमपि करिष्यति।



# अहमदाबादे अनुष्ठीयमानायाम् ऐषमः विश्व-दिव्याङ्ग-धनुर्क्रीडायां, भारतेन द्वे स्वर्णपदके एकं रजतपदकं च अधिगतम्

अहमदाबादे अनुष्ठीयमानायाः विश्व-दिव्याङ्ग-धनुर्क्रीडायाः तृतीय-चरणस्य उपान्तिमे दिवसे भारतीय-धनुर्धरैः त्रीणि पदकानि हस्तगतानि कृतानि । पुरुष-विभागे तोमन-कुमारः, श्यामसुन्दर-स्वामी च पुरुष-कम्पाउण्ड्-दल-स्पर्धायां सुवर्ण-पदकम् अवाप्तवन्तौ । तथैव पुरुष-रिकर्व-दल-स्पर्धायां पैरिस-पैरालम्पिक-विजेता हरविन्दर सिंहः, विजय-सुण्डी च स्वकीयेन उत्कृष्ट प्रदर्शनेन अपरं सुवर्ण पदकम् व्यजयताम्। महिलानां रिकर्व-दल-स्पर्धायां भावना, पूजा च रजत पदकं प्राप्तवत्यौ। परञ्च महिला कम्पाउण्ड्-दल-स्पर्धायां कांस्य-पदक द्वन्द्वे भारतं पराजितं सत् कांस्य पदकात् वञ्चितम्

# किं बालानां सामाजिकमाध्यमोपयोगे प्रतिबन्धः भविष्यति? मैक्रोनेन यूरोपीय-सङ्घात् कठोरकार्यरूपस्य याचना कृता



मास्कोनगरम्। फ्रान्सदेशस्य राष्ट्रपतिना इमैनुएल-मैक्रोनेन यूरोपीय-आयोगस्य अध्यक्षां उर्सुला-वॉन-डेर-लेयेनं पञ्चदशवर्षेभ्यः न्यूनवयस्कानां बालानां सामाजिकमाध्यमोपयोगे प्रतिबन्धार्थं सम्पूर्ण-यूरोप-खण्डे प्रवर्तमानं नियमं निर्मातुं न्यवेद्यत। 'एजेन्स फ्रान्स-प्रेस' इति संस्थया कस्यचित् फ्रांसीसी-नेतुः पत्रस्य उल्लेखं कृत्वा इयं वार्ता प्रदत्ता। वृत्तसङ्कलनस्यानुसारं, मैक्रोनेन विशेषतया 'यूरोपीय-सङ्घस्य सर्वेषां बालानां सुरक्षा' याचितातथा च अस्मिन् कार्ये यूरोपीय-आयोगस्य विभागानां 'विशेषज्ञतायाम् सक्रियसहभागे च' विश्वासः प्रकटितः। वार्तानुसारं, मैक्रोनेन पत्रे उक्तम्, "अस्यां परिस्थितौ त्वरितपदक्षेपस्य आवश्यकता वर्तते।" अगस्तमासस्य मध्यभागे, फ्रान्सदेशस्य सांवैधानिक-परिषदः निर्णयः आसीत् यत् बालानां सामाजिकमाध्यमोपयोगे मैक्रोनस्य प्रस्तावितः प्रतिबन्धः यूरोपीय-सङ्घस्य नियमानुकूलः नास्ति। तथापि, मैक्रोनः २०२७ तमस्य वर्षस्य वसन्ततुं यावत् इमं नियमं प्रवर्तयितुं दृढसङ्कल्पः अस्ति।

# भारतीय-ऋतु-विज्ञान-विभागेन देशस्य पूर्वोत्तर-भागेषु अतीव प्रबल-वृष्टेः पूर्वानुमानं प्रकटितम्

भारतीय-ऋतु-विज्ञान-विभागेन बिहारे, पूर्व-मध्य-प्रदेशे, पूर्व-उत्तर-प्रदेशे, ओडिशायाम्, पश्चिम-बङ्गाले, अथ च देशस्य पूर्वोत्तर-भागेषु अतीव प्रबल-वृष्टेः पूर्वानुमानं प्रकटितम्। ऋतु-विज्ञान-विभागेन अण्डमान-निकोबार द्वीपसमूहेषु, बिहारे, ओडिशायां, हिमालय-तटीय-पश्चिम बङ्गाले, सिक्किमे, तेलङ्गानायां च मेघ गर्जनम्, विद्युत्-सम्पातः अथ च प्रचण्डसमीरश्च प्रवहेदिति सम्भावितम्।

# हि.प्र. उच्चन्यायालयः - स्थितिविवरणं न दत्तवतः शिक्षासचिवस्य उच्चन्यायालये उपस्थितेः आदेशः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य उच्चन्यायालयेन न्यायालयीयादेशानाम् अनुसरणं कृत्वापि स्थितिविवरणं न प्रस्तुतं कृतवति राज्यसर्वकारस्य कार्यप्रणाल्यां तीव्रा अप्रसन्नता व्यक्ता कृता। मुख्यन्यायाधीशेन गुरमीतसिंहसन्धावालिया महोदयेन न्यायाधीशेन बिपिनचन्द्रनेगी-महोदयेन च युक्तपीठेन विद्यालयेषु जे.ए.ओ. (पुस्तकालय) पदानां न पूरणेन सम्बद्धायां जनहितयाचिकायां श्रवणं कुर्वता हिमाचलप्रदेशस्य शिक्षासचिवस्य व्यक्तिगतरूपेण न्यायालये उपस्थितेः आदेशः प्रदत्तः। उच्चन्यायालयेन 21 मई दिनाङ्के सम्पन्ने पूर्वश्रवणे शिक्षासचिवाय स्थितिविवरणं प्रस्तुतुं अन्तिमः अवसरः प्रदत्तः आसीत्। 7 सितम्बर दिनाङ्के सम्पन्नायां श्रवणायां न्यायालयेन दृष्टं यत् शिक्षासचिवस्य पक्षतः न तु किमपि स्थितिविवरणं प्राप्तम्, न च दण्डसम्बद्धा कापि सूचना प्रदत्ता। केवलं विद्यालयशिक्षानिदेशकस्य पक्षतः एकं पत्रं प्रेषितम् आसीत्, यस्मिन् न्यायालयेन स्वस्य अप्रसन्नता व्यक्ता कृता। न्यायालयेन उक्तं यत् शिक्षासचिवं व्यक्तिगत रूपेण आह्वातुं विना तस्य पुरतः अन्यः कोऽपि विकल्पः न अवशिष्यते। अधुना तेन स्वयमेव आगत्य स्पष्टीकर्तव्यं भविष्यति यत् आदेशे सति शपथपत्रं किमर्थं न प्रस्तुतम्। अस्य प्रकरणस्य अग्रिमा श्रवणतिथिः 29 अक्तूबर इति निर्धारितास्ति। उल्लेखनीयं यत् हिमाचलप्रदेशस्य उच्चन्यायालयेन राज्ये कनिष्ठ-कार्यालय- सहायकानां (पुस्तकालय) पदेषु नियुक्तिप्रक्रियायाः पूर्णतायां भवति विलम्बे तथा च राज्यसर्वकारस्य शिथिलकार्यप्रणाल्यां तीव्रा अप्रसन्नता व्यक्ता कृता अस्ति। 15 मई 2023 दिनाङ्के प्रदत्तानां निर्देशानाम् अनुसारं षण्मासानां अन्तः नियुक्ति-पदोन्नतिनियमाः निर्माय रिक्तपदानां पूरणस्य प्रक्रिया पूर्णा कर्तव्या आसीत्। राज्यसर्वकारस्य अस्य शैथिल्यस्य, दीर्घकालतः रिक्तानां पदानां कारणेन प्रदेशस्य शिक्षाव्यवस्था निरन्तरं दुरवस्थां गच्छति। आहत्य 771 पदानि चरणबद्धरूपेण पूरणीयानि आसन्, येषु 235 रिक्तपदानां पूरणस्य अनुमतिः सर्वकारेण पूर्वमेव प्रदत्ता आसीत्। वित्तविभागेन 3 मई 2024 दिनाङ्के शिक्षाविभागे 400 जे.ए.ओ. (पुस्तकालय) पदानि पूरयितुं अनुमोदनं प्रदत्तम् आसीत्। प्रथमचरणे 100 विद्यालयेषु नियुक्तेः निर्णयः कृतः तथा हिमाचलप्रदेशराज्यचयनायोगाय 78 पदानां संस्तुतिपत्रं प्रेषितम् आसीत्। 19 जुलाई 2025 दिनाङ्के चयनायोगेन एतत् पत्रं प्रत्यावर्तितं यत् एतत् नियुक्ति-निदेशालयस्य माध्यमेन प्रेषणीयम्। उच्चन्यायालयेन शिक्षासचिवस्य माध्यमेन नूतनं स्थितिविवरणं याचितम् आसीत्, यस्मिन् सर्वकारेण स्पष्टं कर्तव्यं भविष्यति यत् नियुक्तिप्रक्रियायाः अन्तिमपर्यन्तं सम्पादनार्थं के उपायाः क्रियमाणाः सन्ति तथा च अद्यावधि एतत् कार्यं किमर्थं पूर्णं न जातम्।

# उच्चन्यायालयस्य विशेषबालानां विद्यालये रिक्तपदानां पूरणाय सर्वकाराय निर्देशः

**हिमसंस्कृतवार्ताः- शिमला।** प्रदेशस्य उच्चन्यायालयेन शिमलानगरस्य समीपे ढलीस्थाने स्थिते विशेषबालानां विद्यालये शिक्षकाणां तथा अन्यकर्मचारिणां रिक्तपदेषु कठोरं संज्ञानं गृहीतम् अस्ति। मुख्यन्यायाधीशेन गुरमीतसिंहसन्धावालिया महोदयेन न्यायाधीशेन बिपिनचन्द्रनेगी-महोदयेन च युक्तपीठेन अस्मितासिंहमहोदयायाः पक्षतः प्रस्तुतायां जनहितयाचिकायां श्रवणं कुर्वता राज्यसर्वकाराय विद्यालये रिक्तानि सर्वाणि पदानि शीघ्रमेव पूरयितुं निर्देशाः प्रदत्ताः सन्ति। याचिकाकर्त्या न्यायालयस्य समक्षं 29 अक्तूबर 2023 दिनाङ्कितस्य पत्रस्य उल्लेखः कृतः। तेन स्पष्टं जातं यत् विद्यालये ब्रेल-प्रशिक्षकस्य तथा गतिशीलता-प्रशिक्षकस्य पदानि वर्षे 2006 तथा 2016 मध्ये स्वीकृतानि सन्ति, तथापि अद्यापि रिक्तानि एव सन्ति। पीठेन टिप्पणी कृता यत् अस्य विशेषशैक्षणिकसंस्थानस्य विशिष्टतां आवश्यकतां च दृष्ट्वा पदानां रिक्तावस्था चिन्ताजनका अस्ति।

# हिमाचलाय पुनः प्रदीयतां शानन- जलविद्युत्परियोजना, मुख्यमन्त्रिणा केन्द्रीय- ऊर्जामन्त्रिणः समक्षं विषयः उत्थापितः

**हिमसंस्कृतवार्ताः- नवदेहली।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः मङ्गलवासरे नवदेहल्यां केन्द्रीय- ऊर्जाविभागस्य, आवास-नगरकार्यविभागस्य मन्त्री मनोहरलालं समुपेत्य तेन सह सम्मिल्य वार्तां कृतवान्। अस्मिन् अवसरे मुख्यमन्त्रिणा हिमाचलप्रदेशस्य विद्युत्क्षेत्रसम्बद्धाः विविधाः महत्त्वपूर्णाः लम्बिताश्च विषयाः केन्द्रीयमन्त्रिणः समक्षं प्रस्तुताः, तेषां शीघ्रसमाधानाय च आग्रहः कृतः। मुख्यमन्त्रिणा हिमाचलप्रदेशस्य निःशुल्कविद्युत्भागस्य स्थाने नवीकरणीय- ऊर्जाप्रमाणपत्राणां प्रदानेन सम्बद्धः विषयः प्रमुखतया उत्थापितः। तेन उक्तं यत् राज्याय निःशुल्कविद्युत्भागस्य यथोचितः लाभः प्राप्तव्यः, अस्मिन् विषये आवश्यकं स्पष्टीकरणं समाधानं च प्रदातव्यम्। तेन सतलुज- जलविद्युत्-निगमस्य निदेशकमण्डले हिमाचलप्रदेशस्य पक्षतः द्वयोः स्वतन्त्रनिदेशकयोः नामाङ्कनस्य विषयः अपि उत्थापितः। राज्यस्य हितानि दृष्ट्वा एषा प्रक्रिया शीघ्रं पूर्णा क्रियताम् इति केन्द्रीयमन्त्रिणः समक्षं आग्रहः कृतः। मुख्यमन्त्रिणा शानन-जलविद्युत्परियोजनां हिमाचलप्रदेशाय हस्तान्तरितुं सम्बद्धः विषयः अपि प्रमुखतया प्रस्तुतः। तेन उक्तं यत् परियोजनायां हिमाचलप्रदेशस्य अधिकारान् राज्यहितं च दृष्ट्वा आवश्यकाः कार्यविधयः शीघ्रं सम्पादनीयाः। अस्य विषयस्य प्रकरणं सम्प्रति न्यायालये विचाराधीनम् अस्ति। मुख्यमन्त्रिणा वर्षे 2008 तमे जलविद्युत्-नीतेः प्रवर्तनात् पूर्वं प्रारब्धानां केन्द्रीयक्षेत्रीय- जलविद्युत्परियोजनानां कृते परियोजनानां प्रारम्भादनन्तरं स्थानीयक्षेत्रविकासनिधिरूपेण एकप्रतिशतम् अतिरिक्तां निःशुल्कविद्युत् प्रदातुं राज्यस्य पूर्वोक्तमागः पुनरपि प्रस्तुतः। तेन उक्तं यत् एतेन प्रावधानेन परियोजनाभिः प्रभावितानां क्षेत्राणां विकासः तीव्रतरः भविष्यति, येन स्थानीयजनाः लाभान्विताः भविष्यन्ति। मुख्यमन्त्रिणा उक्तं यत् राज्यसर्वकारस्य आकलनानुसारम् अस्य व्यवस्थायाः फलस्वरूपं हिमाचलप्रदेशाय प्रतिवर्षं प्रायः 29.34 कोटिरूप्यकाणां लाभः प्राप्तुं शक्यते। अपरत्र अन्येषु लाभार्थिराज्येषु प्रतिवर्षं प्रायः 96.57 कोटिरूप्यकाणां भारः भविष्यति। हिमाचलप्रदेशस्य अनुमानितः शुद्धवार्षिकलाभः प्रायः 23.21 कोटिरूप्यकाणि भविष्यति, यदा तु अन्येषु लाभार्थिराज्येषु शुल्कस्य प्रभावः प्रायः 1.15 प्रतिशतं भवितुम् अनुमानितः अस्ति।



मुख्यमन्त्रिणा 180 मेगावाट- क्षमतायुक्तां बैरास्यूल- जलविद्युत्परियोजनाम् अपि 40 वर्षाणां अवधिपूर्तेः अनन्तरं हिमाचलप्रदेशाय हस्तान्तरितुं सम्बद्धः विषयः केन्द्रीयमन्त्रिणः समक्षं प्रस्तुतः। राज्यस्य हितं दृष्ट्वा परियोजनायाः हस्तान्तरणाय आवश्यकां प्रक्रियां शीघ्रं अग्रे नेतुम् आग्रहः कृतः। केन्द्रीय- ऊर्जामन्त्री मनोहरलालः मुख्यमन्त्रिणा उत्थापितेषु सर्वेषु विषयेषु सकारात्मकतया विचारं कर्तुं समाधानाय च आवश्यकाः कार्यविधयः सम्पादयितुं आश्वासनं दत्तवान्। अस्यां सभायां मुख्यसचिवः कमलेशकुमारपन्तः, मुख्यमन्त्रिणः प्रधानपरामर्शदाता रामसुभगसिंहः, प्रधानसचिवः (वित्तम्) देवेशकुमारः तथा मुख्यमन्त्रिणः सचिवः राकेशकँवरः अपि उपस्थिताः आसन्।

## बीबीएमबी-अधिकृतम् अतिरिक्तं भूमिभागं प्रत्यर्पयतु

मुख्यमन्त्रिणा भाखडाव्यासप्रबन्धनमण्डलेन (बीबीएमबी) प्रदेशे अधिकृता या भूमिः सम्प्रति किमपि प्रयोजनं न साधयति, तस्याः भूमेः हिमाचलप्रदेशसर्वकाराय उपयोगार्थं प्रदानेन सम्बद्धः विषयः अपि उत्थापितः। एतादृश्याः भूमेः उपयोगः सर्वकारीयकार्यालयानां निर्माणाय, परियोजनाभिः विस्थापितानां जनानां पुनर्वासाय तथा तेभ्यः भूमेः उपलब्धतां सुनिश्चितुं च कर्तुं शक्यते। मुख्यमन्त्रिणा प्रदेशस्य व्यापकहितं दृष्ट्वा एतादृश्याः भूमेः उपयोगाय अनुमतिः प्रदातुं केन्द्रीयमन्त्रिणः समक्षं आग्रहः कृतः।

# हिमाचलप्रदेशस्य

## आपदाप्रभावितनदीक्षेत्रेषु वैज्ञानिक- जलमृत्तिका- निष्कासनविषये चर्चा



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमंत्रिणा सुखविन्द्रसिंहसुक्खुना नवदिल्लीस्थाने केन्द्रीयपर्यावरण- वन- वायुपरिवर्तनमन्त्री भूपेन्द्रयादवमहोदयेन सह साक्षात्कारं कृत्वा हिमाचलप्रदेशस्य जलोप्लवप्रभावितेषु नदीक्षेत्रेषु वैज्ञानिकरीत्या जलमृत्तिकादीनां निष्कासनस्य (ड्रेजिङ्गस्य) सम्बन्धिनः महत्त्वपूर्णाः विषयाः चर्चिताः। अत्यधिकवृष्ट्या, जलोप्लवेन आकस्मिकपूरैश्च नदीनां प्रवाहमार्गेषु सञ्चितैः अवशेषैः, विशालशिलाभिः, पाषाणैः, सिकताभिश्च नदीजलस्य वहनक्षमता प्रभावितं भवति। फलतः नदीतीरवर्तिनां बस्तीनां, मार्गाणां, सेतूनां, वनानां तथा महत्त्वपूर्णानां आधारभूतसंरचनानां सुरक्षायाः संकटं वर्धते। अतः आपदाजन्यसंकटस्य न्यूनीकरणाय एतादृशेषु क्षेत्रेषु वैज्ञानिकरीत्या समयबद्धं च जलमृत्तिकादिनिष्कासनं (ड्रेजिङ्गं) नितान्तमावश्यकम्। केन्द्रीयमन्त्रिमहोदयात् वनपरामर्शसमित्याः निर्णयानामनुरूपं स्पष्टनिर्देशानां निर्गमनाय, 'परिवेश' पटले नदीजल- मृत्तिका- निष्कासनाय पृथक् श्रेणीं निर्मातुं, तत् पारम्परिकखननकार्येभ्यः पृथक् परिगणयितुं तथा च जलमृत्तिकानिष्कासन-परियोजनाभ्यः प्रतिपूरकवनरोपणस्य अनिवार्यतायाः मुक्तिं प्रदातुं आग्रहः कृतः। भूपेन्द्रयादवमहोदयेन हिमाचलप्रदेशे वैज्ञानिकजलमृत्तिकानिष्कासनस्य कृते आवश्यकनिर्देशानां निर्गमनस्य, प्रकरणेषु प्रदेशहितानां प्राथमिकतया विचारस्य, प्रभाविनदीप्रबन्धनाय आपदाजन्य-संकटन्यूनीकरणाय च आवश्यकसहयोगस्य आश्वासनं प्रदत्तम्।

# सीमावर्ति-प्रदेशेभ्यः उत्तरबिहारं यावत् संवर्धिष्यते

## वैमानिक-सम्पर्कः : रक्सौले भूमि-अधिग्रहणम् सम्पन्नम्, मुजफ्फरपुरे ₹५८.८७ कोटि-रूप्यकाणां कार्याणि प्रारब्धानि




**रक्सौलम् हिमसंस्कृतवार्ताः राघव नाथ झा।** बिहारराज्ये क्षेत्रीय-वैमानिक-सम्पर्कं सुदृढं विधातुं सर्वकारेण अनेकासां विमानपत्तन-परियोजनानां कार्यं द्रुतगत्या प्रचाल्यते। नागर-विमानन-विभागानुसारं विविधाः योजनाः भूम्यधिग्रहण-निविदा-तकनीकी-अध्ययन-निर्माणस्य पृथक्-पृथक् चरणेषु वर्तन्ते। विकास-आयुक्त-प्रकोष्ठः एतासां नियमितम् अनुवीक्षणं करोति।

**रक्सौल-विमानपत्तनम् :** सीमावर्ति-रक्सौल-विमानपत्तनाय आवश्यकं भूम्यधिग्रहणं पूर्णं जातम्। विमानस्थल-संरचनायै अभियान्त्रिकी-परामर्श-प्रक्रिया अग्रेसरा अस्ति। धावनमार्ग-विस्तारेण सह एतत् विमानपत्तनम् एप्रिल-२०२९ पर्यन्तं सञ्चालनयोग्यं विधातुं लक्ष्यं निर्धारितम्।

**मुजफ्फरपुर-विमानपत्तनम् :** अत्र प्रस्थान-भवन-नियन्त्रणगोपुर-अग्निशमनकेन्द्रादीनां निर्माणार्थं ₹२७.६७ कोटि-रूप्यकाणां कार्यादेशः प्रदत्तः। धावनमार्ग-एप्रन्-टैक्सीवे-विकासाय च ₹३१.२० कोटि-रूप्यकाणां योजना स्वीकृता। आहत्य अत्र प्रायः ₹५८.८७ कोटि-रूप्यकाणां व्ययः भविष्यति।

**पूर्णिया-विमानपत्तनम् :** नूतन-नागरिक-परिसरस्य (सिविल-एन्क्लेव) निर्माणाय निविदा-प्रक्रिया प्रचलति। योजनां मे-२०२८ पर्यन्तं समाप्य जून-२०२८ तमे वर्षे विमान-सञ्चालनस्य लक्ष्यं वर्तते।

वीरपुरं वाल्मीकिनगरं च : उभयोः विमानपत्तनयोः भवन-नियन्त्रणगोपुर-अग्निशमनादि-संरचनानां विकासप्रक्रिया प्रगतिपथे वर्तते।

**सहरसा-विमानपत्तनम् :** अत्र भवनानां कृते पुनर्निfeed-प्रक्रिया धावनमार्गस्य कार्यं च अग्रे सरति।

**फारबिसगञ्जः सबेया च :** फारबिसगञ्ज-विमानपत्तनम् 'उडान' (UDAN) योजनान्तर्गतं विकस्यते। गोपालगञ्जस्थ-सबेया-विमानपट्टिकायाः प्रारम्भिकाध्ययने परियोजना उपयुक्ता प्राप्ता।

**छपरा, उलावः, किशनगञ्जः च :** छपरा-विमानपत्तने सङ्कुचितभूमिः सान्द्रजनसङ्ख्या च, बेगूसराय-उलाव-विमानपत्तने च तैलशोधनागारस्य सान्निध्यं धावनमार्ग-विस्तारे प्रतिबन्धकं वर्तते। किशनगञ्ज-विमानपत्तनस्य धावनमार्गं द्विसहस्रं (२०००) मीतरोन्मितं विस्तारयितुं प्रायः २४.७० एकड्-परिमिता भूमिः अधिगृह्यते।

**क्षेत्रीय-विकासाय बलं प्राप्स्यते**

एतासां योजनानां सम्पूर्त्या उत्तरबिहारे सीमावर्ति-क्षेत्रेषु च वायुयान-सम्पर्कः सुगमः भविष्यति। अनेन व्यापार-पर्यटन-निवेश-रोजगाराणाम् अवसराः संवर्धिष्यन्ते, राज्यस्य सन्तुलित-विकासाय नवीना गतिः प्राप्स्यते च।भागलपुरे

# आंगनबाडीकर्मचारिणां सम्मानं मानदेयवृद्धिश्च

**हिमसंस्कृतवार्ताः- रेउसा, सीतापुरम्, उत्तरप्रदेशः।** बालविकाससेवापुष्टाहारविभागस्य तत्त्वावधाने मङ्गलवासरे रेउसा-खण्डसभागारे आंगनबाडी- कर्मचारिणीनां सहायिकानां च सम्माननार्थं मानदेयवृद्धेः च कार्यक्रमः आयोजितः। अयोध्यायां मुख्यमन्त्रिणा योगी आदित्यनाथेन प्रदेशस्य आंगनबाडीकर्मचारिणीनां सहायिकानां च कृते आयोजितस्य सजीवसम्मानसमारोहस्य क्रम एव अयं कार्यक्रमः सम्पन्नः। कार्यक्रमे सेवताविधानसभाक्षेत्रस्य विधायकः ज्ञान तिवारी मुख्यातिथिरूपेण उपस्थितः आसीत्।




तेन आंगनबाडीकर्मचारिणीनां सहायिकानां च सम्मानस्य, कल्याणस्य सशक्तीकरणस्य च दिशि प्रदेशसर्वकारेण क्रियमाणानां प्रयासानां विषये जानकारी प्रदत्ता। वक्तारः अवदन् यत् मुख्यमन्त्रिणः योगी आदित्यनाथस्य नेतृत्वे आंगनबाडीकर्मचारिणीनां सहायिकानां च मानदेये महती वृद्धिः कृता। ताभ्यः तासां परिवारजनेभ्यश्च पञ्चलक्षरूप्यकाणां पर्यन्तं स्वास्थ्यबीमासुविधा अपि प्रदीयते। कार्यक्रमे आंगनबाडीकर्मचारिणीनां महत्त्वपूर्णां भूमिकां प्रकाशयन् वक्तारः अवदन् यत् मातृशिशुस्वास्थ्ये, पोषणव्यवस्थायां बालानां संस्कारनिर्माणे च तासां योगदानम् अत्यन्तं महत्त्वपूर्णम् अस्ति। आंगनबाडीबहूनां सम्मानस्य, सुरक्षायाः सशक्तीकरणस्य च कृते प्रदेशसर्वकारः निरन्तरं प्रयत्नशीलः अस्ति।

"आंगनाडीबहूनां सम्मानः प्रदेशस्य उज्ज्वलभविष्यस्य सम्मानः अस्ति" इति सन्देशेन कार्यक्रमस्य महत्त्वं प्रतिपादितम्। कार्यक्रमे उपस्थिताभिः कार्यकर्त्रीभिः सहायिकाभिश्च सर्वकारस्य कल्याणकारीप्रयासेषु प्रसन्नता व्यक्तीकृता तथा आभारः प्रकटितः।

# लनामिवि-दरभङ्गायाः राष्ट्रीयसेवायोजना-प्रकोष्ठेन दरभङ्गा-मण्डलस्य द्विशतं (२००) स्वयंसेवकानां कृते 'युवा आपदा-मित्र-प्रशिक्षण-शिबिरम्' प्रारब्धम्




**बिहार-राज्य-आपदा-प्रबन्धन-प्राधिकरण-पटनायाः सौजन्येन जुबिली-सभागारे तृतीयस्य सप्तदिवसीयस्य आवासीय-आपदा-प्रबन्धन-प्रबशिक्षणस्य समुद्घाटनम् अभवत्**

**हिमसंस्कृतवार्ताः राघव नाथ झा।** ललितनारायणमिथिलाविश्वविद्यालयस्य (दरभङ्गा) कुलपतेः प्रो. सञ्जयकुमारचौधुरिमहोदयस्य निर्देशानुसारं बिहार-राज्य-आपदा-प्रबन्धन-प्राधिकरण-पटनायाः सौजन्येन जुबिली-सभागारे दरभङ्गा-मण्डलस्य विभिन्नानां महाविद्यालयानां द्विशतं (२००) राष्ट्रीयसेवायोजनायाः (एनएसएस) स्वयंसेवकानां कृते सप्तदिवसीयस्य आवासीयस्य 'युवा आपदा-मित्र-प्रशिक्षण-शिबिरस्य' शुभारम्भः जातः। प्रारम्भे राष्ट्रगीतस्य राष्ट्रगानस्य च गायनानन्तरम् अतिथिभिः दीपप्रज्वालनेन शिबिरस्य समुद्घाटनं कृतम्।
सामाजिकविज्ञान-सङ्कायस्य अध्यक्षस्य प्रो. ध्रुवकुमारस्य अध्यक्षत्वे आयोजिते उद्घाटनसत्रे भू-सम्पदाधिकारी डॉ. कामेश्वरपासवानः विशिष्टातिथिरूपेण, बिहटा-पटना-स्थस्य राज्य-आपदा-प्रतिवादन-बलस्य (एसडीआरएफ) प्रशिक्षकः रूपेशकुमारपासवानः मुख्यवक्तृत्वेन, शिबिरसंयोजकः डॉ. आर. एन. चौरसिया स्वागतकर्तृ-विषयप्रवेशकर्तृरूपेण, एनएसएस-समन्वयिका-द्वितीया डॉ. शबनमकुमारी धन्यवादज्ञापनकर्त्रीरूपेण तथा च मञ्चसञ्चालिका डॉ. रीताकुमारी इत्यादयः स्वविचारान् प्राकटयन्। मञ्चस्थानाम् अतिथीनां सहैव मुकेशकुमारझा-मणिकान्तठाकुरयोः तथा एसडीआरएफ-दलस्य पङ्कजकुमार-राजुकुमार-सन्तोषकुमार-पूजाकुमारी-मिथिलेशतिवारीप्रभृतीनां पाग-वस्त्र-स्मृतिचिह्न-पुष्पगुच्छैः स्वागतं व्यदधुः। अस्मिन् अवसरे डॉ. रीताकुमारी, डॉ. अनुपमप्रिया, डॉ. शम्भुपासवानः, डॉ. सुजीतकुमारसाफी, डॉ. उदयकुमारः, डॉ. अमितकुमारसिन्हा, कुमारनीरजः, डॉ. युगेश्वरसाहः, डॉ. अजयकुमारः इत्यादयः एनएसएस-अधिकारिणः तथा अक्षयकुमारझा-अमितकुमारझा-विकासकुमार-सुमीतकुमार-रवीन्द्रकुमारसिंहादयः सक्रियं सहयोगम् अकुर्वन्।
अध्यक्षीयभाषणे प्रो. ध्रुवकुमारः अवदत् यत् आपदाप्रशिक्षणेन यूनाम् एका महती शक्तिः सज्जा भविष्यति, या विपत्काले समाजे जनधनयोः रक्षणे सक्षमा स्यात्। एसडीआरएफ-दलं एनएसएस-माध्यमेन चतुर्षु वर्गेषु (बैचेषु) आहत्य अष्टशतं (८००) स्वयंसेवकान् व्यावहारिकधरातले प्रशिक्षितं कुर्वत् अस्ति, यत् अस्माकं समाजाय आधारशिला भविष्यति। सः न्यवेदयत् यत् बिहारराज्यं बहुभिः आपदाभिः ग्रस्तं वर्तते। वयं विपदः स्थगयितुं तु न शक्नुमः, किन्तु शिक्षितानां यूनां बलेन तासां प्रभावं न्यूनीकर्तुं निश्चयेन शक्नुमः। सः आह्वानम् अकरोत् यत् आपदाकाले बह्व्यः जनश्रुतयः (किंवदन्त्यः) प्रसरन्ति, याः निवारयितुम् अस्माकं स्वयंसेवकाः निश्चयेन यतिष्यन्ते। मुख्यवक्तृरूपेण एसडीआरएफ-प्रशिक्षकः रूपेशकुमारपासवानः अकथयत् यत् बिहारराज्यं बहु-आपदा-प्रभावितं राज्यम् अस्ति। यदि प्रत्येकस्मिन् ग्रामपञ्चायते शिक्षिताः स्वयंसेवकाः भवेयुः, तर्हि विपत्प्रभावस्य न्यूनीकरणं सम्भवम् अस्ति। प्रशिक्षितेऽस्मिन् स्वयंसेवकाः विपत्तेः पूर्वं, विपत्काले, विपदः पश्चात् च किं करणीयम् किं च न करणीयम् इति ज्ञास्यन्ति। सः अवदत् यत् अस्माकं दलम् अस्यां कार्यशालायां सर्वविधानाम् आपदानां विषये सूक्ष्मतया विस्तृतविवरणं प्रदास्यति।
विशिष्टातिथिः डॉ. कामेश्वरपासवानः अवदत् यत् पटनायाः सुयोग्या एसडीआरएफ-सेना अष्टशतं स्वयंसेवकान् उच्चस्तरीयप्रशिक्षणं प्रदाय आपदा-मित्रं रचयन्ती अस्ति, यत् मिथिलाञ्चलाय अतीव लाभप्रदं सेत्स्यति। विपत्काले शिक्षिताः स्वयंसेवकाः अग्रिमपङ्क्तौ स्थित्वा समाजं रक्षिष्यन्ति। अतिथीनां स्वागतं विषयप्रवेशं च कुर्वन् शिबिरसंयोजकः डॉ. आर. एन. चौरसिया प्रत्यपादयत् यत् युवानः सामाजिकपरिवर्तनस्य वाहकाः नेतारश्च सन्ति। एते युवानः 'विकसितभारतम्-२०४७' इत्यस्य केवलाः साक्षिणः न, अपि तु सारथयः अपि भविष्यन्ति। यदि शिक्षिताः स्वयंसेवकाः आपदा-न्यूनीकरणे सक्रिययोगदानं करिष्यन्ति, तदैव विकसितभारतस्य निर्माणं सम्भविष्यति। सः आह्वानम् अकरोत् यत् स्वयंसेवकाः आपदाविषयकस्य व्यावहारिकज्ञानस्य सदुपयोगं कृत्वा समाजस्य रक्षकाः भविष्यन्ति तथा च राष्ट्रस्य महार्हाः मानवसंसाधनाः सिद्धिष्यन्ति।
धन्यवादं व्याहरन्ती डॉ. शबनमकुमारी अवदत् यत् अस्माकं देशस्य एनडीआरएफ/एसडीआरएफ-दलानि विदेशेषु अपि विपत्तौ साहाय्यार्थं गच्छन्ति। प्रशिक्षणानन्तरम् एतेषां स्वयंसेवकानाम् उत्तरदायित्वम् अधिकं वर्धिष्यते। एते न केवलं स्वयं सक्रियाः भविष्यन्ति, अपि तु स्वसमाजम् अपि जागरुकं प्रशिक्षितं च करिष्यन्ति।
अत्रान्तरे बौद्धिकसत्रे के. एस. महाविद्यालयस्य (दरभङ्गा) कार्यक्रमानुष्ठानाधिकारी डॉ. अमितकुमारसिन्हा स्वयंसेवकानां महत्त्वानि उत्तरदायित्वानि च विस्तरेण अबोधयत्। तदनन्तरं प्रशिक्षकैः विपत्तेः परिभाषा, प्रकाराः, कारणानि तथा विपत्प्रबन्धननियमादीनां विषये सविस्तरं ज्ञानं दत्तम्।



## राज्यस्तरीय-टेबल-टेनिस-प्रतियोगितायां डीपीएस-बोकारोस्य बालक्रीडकानां शीर्षस्थानप्राप्तिः

संवाददाता प्रेरकः च -सौरभः दे

बोकारो। पूर्वसिंहभूमि-मण्डल-टेबल-टेनिस-सङ्घस्य तत्त्वावधाने जमशेदपुर-नगरस्थिते जे.आर.डी. टाटा-क्रीडाङ्गणे आयोजितायां द्वितीय-झारखण्ड-राज्य-टेबल-टेनिस-रैंकिङ्ग-चैम्पियनशिप्-2026 इत्याख्यायां प्रतियोगितायां दिल्ली-पब्लिक-विद्यालयः (डीपीएस) बोकारो इत्यस्य बालक्रीडकैः उत्कृष्टं क्रीडाप्रतिभाप्रदर्शनं कृतम्। प्रतियोगितायाः अण्डर-11 वर्गे विद्यालयस्य पञ्चम-कक्षायाः छात्रौ शिवांश-राजः तथा ईशान्वी-शिवा, षष्ठ-कक्षायाः छात्रः आद्रिक-कश्यपः च उत्कृष्टं प्रदर्शनं कृत्वा क्रमशः प्रथमं, द्वितीयं तथा तृतीयं स्थानं प्राप्तवन्तः।
अस्यां प्रतियोगितायां राज्यस्य विभिन्नेभ्यः जनपदेभ्यः २५०-तः अधिकाः क्रीडकाः सहभागितां कृतवन्तः। बोकारो-जनपदस्य दलस्य प्रतिनिधित्वं कुर्वन्तः एते त्रयः छात्राः अण्डर-11 वर्गे स्वप्रतिभां प्रदर्श्य प्रशंसनीयं प्रदर्शनं कृतवन्तः। शिवांश-राजः प्रथमस्थानं, ईशान्वी-शिवा द्वितीयस्थानं, आद्रिक-कश्यपः च तृतीयस्थानं प्राप्तवन्तः। विजेतृभ्यः त्रिभ्यः क्रीडकेभ्यः प्रमाणपत्राणि ट्रॉफी-चिह्नानि च प्रदाय पुरस्कृताः। शनिवासरे रविवासरे च सम्पन्नायाः अस्याः प्रतियोगितायाः अनन्तरं विद्यालयं प्रत्यागतेषु एतेषु बालक्रीडकेषु मङ्गलवासरे विद्यालयस्य विशेषसभायां प्राचार्यः डॉ. ए. एस. गंगवारः सम्मानं कृत्वा तेषां उत्साहवर्धनं कृतवान्। सः छात्रान् भविष्येऽपि एतादृशमेव उत्कृष्टं क्रीडाप्रदर्शनं कृत्वा स्वविद्यालयस्य, जनपदस्य, राज्यस्य च गौरवं वर्धयितुं प्रेरितवान्।

# स्वच्छवायुसर्वेक्षणे पाटलिपुत्रनगरस्य उल्लेखनीयं प्रदर्शनम्, १६तमं स्थानं प्राप्तम्



**हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, भागलपुरम्।** पाटलिपुत्रनगरेण स्वच्छवायुसर्वेक्षणम् २०२६ इत्यस्मिन् देशस्य १० लक्षाधिकजनसंख्यायुक्तानां ४८ नगराणां मध्ये उल्लेखनीयं प्रगतिप्रदर्शनं कृतम्। अस्मिन् सर्वेक्षणे पाटलिपुत्रनगरं १६तमं स्थानं प्राप्तवान्। गतवर्षे १६४.५ अङ्कैः सह नगरं २७तमस्थाने आसीत्, परन्तु अस्मिन् वर्षे ३७ मानदण्डानां मूल्याङ्कने १७८ अङ्काः प्राप्ताः। अस्मिन् वर्षे प्रथमवारं प्रभागस्तरेऽपि स्वच्छवायुसर्वेक्षणस्य मूल्याङ्कनं कृतम् आसीत् । तत्र पाटलिपुत्रनगरस्य प्रभाग ४३ स्ववर्गे राज्यस्तरे प्रथमस्थानं प्राप्तवान्। अपरतः प्रभागः ९ राष्ट्रियस्तरस्य शीर्ष- ९ प्रभागेषु स्थानं प्राप्य राज्यस्तरेऽपि प्रथमस्थानं प्राप्तवान्। उभाभ्यां प्रभागाभ्यां नगरनिगमाय आहत्य ४० लक्षरूप्यकाणां पुरस्कारराशिः प्राप्ता। तत्र प्रभागः– ४३ इत्यस्य कृते २५ लक्षरूप्यकाणि तथा प्रभागः– ९ इत्यस्य कृते १५ लक्षरूप्यकाणि। प्रभागः– ४३ त्रिंशत्सहस्राधिकजनसंख्यायुक्तानां प्रभागानां वर्गे राज्यस्य प्रथमस्थानं प्राप्तवान्। पुरस्कारराश्या राजेन्द्रनगर, महमूदीचक, मैलाटङ्गी रोड, आर्यकुमार रोड, पाटलिपुत्रपथ इत्यादिषु क्षेत्रेषु वायुप्रदूषणनियन्त्रणसम्बद्धानि पर्यावरणीयकार्याणि भविष्यन्ति। तथैव प्रभागः– ९ इत्यत्र १०–३० सहस्रजनसंख्यायुक्तानां प्रभागानां वर्गे राष्ट्रियस्तरस्य शीर्ष नवप्रभागमध्ये स्थानं प्राप्तवान्, राज्ये प्रथमस्थानं च प्राप्तवान्। प्राप्तया १५ लक्षरूप्यकाणां राश्या एयरपोर्ट्, राजवंशी नगर, हार्डिङ्ग रोड, कौशलनगर इत्यादिक्षेत्रेषु वायुप्रदूषणनियन्त्रणोपायाः क्रियन्ते। उभयोः प्रभागयोः मूल्याङ्कनं विविधेषु पर्यावरणीयेषु स्वच्छतामानदण्डेषु कृतम् आसीत्। तेषु वृक्षारोपणं, हरितीकरणं, मार्गपार्श्वेषु वृक्षारोपणं, नियमितः अवशिष्टसंग्रहः, मार्गाणां स्वच्छता, स्वीपिङ्यन्त्राणां प्रयोगः, निर्माणविध्वंस-अपशिष्टस्य वैज्ञानिकप्रबन्धनम् तथा जनजागरूकता इत्यादयः प्रमुखाः विषयाः आसन्। एतेषु क्षेत्रेषु उत्तमं प्रदर्शनं पाटलिपुत्रनगरस्य उपलब्धेः प्रमुखं कारणं मन्यते। नगरनिगमस्य महापौरः सीतासाहू उक्तवती यत्- “स्वच्छवायुसर्वेक्षणे पाटलिपुत्रनगरस्य उत्कृष्टं प्रदर्शनं सम्पूर्णनगरनिगमाय गौरवस्य विषयः अस्ति। एषा उपलब्धिः स्वच्छस्य हरितस्य च पाटलिपुत्रनगरस्य दिशि क्रियमाणानां निरन्तरप्रयत्नानां फलम् अस्ति।” नगरायुक्तः यशपालमीणा अपि उक्तवान् यत् मार्गपार्श्वेषु हरितीकरणं, वृक्षारोपणम्, अवशिष्टप्रबन्धनं, निर्माणविध्वंस- अपशिष्टस्य वैज्ञानिकप्रबन्धनं, मार्गाणां समुचितस्वच्छता, जनजागरूकता इत्यादिषु क्षेत्रेषु निरन्तरं कार्यं क्रियते। एतत् प्रदर्शनं नगरनिगमस्य सततप्रयत्नानां सकारात्मकं परिणामं दर्शयति।

# आपत्-साहाय्यविषये मन्त्री रत्नेशसदा कठोरः अवदत्— 'कोऽपि पीडितः साहाय्यात् वञ्चितः न भवेत्, प्रमादे सति निश्चितं भविष्यति उत्तरदायित्वम्'




**भागलपुरम् हिमसंस्कृतवार्ताःराघव नाथ झा**
मण्डले जलप्लावितानां क्षेत्राणां साहाय्य-रक्षणकार्याणां समीक्षां कर्तुं सम्प्राप्तः आपदा-प्रबन्धनमन्त्री रत्नेशसदा अधिकारिणः स्पष्टम् आदिशत् यत् कोऽपि योग्यः प्लावनपीडितः सर्वकार-साहाय्यात् वञ्चितः न भवेत्। सः अकथयत् यत् साहाय्यवितरणे प्रमादे अनियमिततायां वा प्राप्तायां सत्यां सम्बद्धाधिकारिणाम् उत्तरदायित्वं निश्चेष्यते।

जलप्लावितानि क्षेत्राणि निरीक्ष्य मन्त्रिणा विश्रामभवने (सर्किट-हाउस्) अधिकारिभिः सह समीक्षासभा आयोजिता। सभायां साहाय्यसामग्रीवितरणस्य, **सामुदायिकपाकशालायाः** (कम्युनिटी किचन), जी.आर.-साहाय्यराशेः स्वास्थ्यसेवानां च प्रगतेः विवरणं गृहीतम्।

**सामुदायिकपाकशालाम् अगच्छद्भ्यः शुष्कखाद्यान्नम् :** मन्त्रिणा समादिष्टं यत् ये जनाः केनापि कारणेन सामुदायिकपाकशालां प्राप्तुं न शक्नुवन्ति, तेभ्यः शुष्कखाद्यान्नं वितीर्यताम्। भोजनसमस्यानिवारणाय नाथनगरस्य पश्चिमाञ्चले एका नवीना सामुदायिकपाकशाला अपि प्रारभ्यताम्।

**त्रयोदश-पञ्चायतानाम् आवेदनानां त्वरितं प्रमाणीकरणम् :** सभायां मन्त्री त्रयोदशभ्यः प्लावनग्रस्तेभ्यः ग्रामपञ्चायतेभ्यः प्राप्तानि आवेदनानि मण्डलाधिकारिणे समर्प्य तेषां शीघ्रं प्रमाणीकरणं कर्तुं साहाय्यं च प्रापयितुम् आदिशत्। वितरणे व्यर्थः विलम्बः नैव सोग्धव्यः।

**जी.आर.-साहाय्यराशेः समये वितरणम् :** लाभार्थिनां नामावली सर्वथा पारदर्शिनी भवेत्। सर्वेषां योग्यानां परिवाराणां वित्तकोषलेखासु (बैंक-खातेषु) साहाय्यधनप्रेषणप्रक्रिया द्रुतगत्या पूर्यताम्, कोऽपि सत्यपीडितः नामावल्याः बहिः न तिष्ठेत्। शिविरेषु स्वास्थ्यस्य पशूनां च व्यवस्था : साहाय्यशिविरेषु वैद्यकीयदलस्य उपस्थितिः, पर्याप्तमात्रायां सर्पदंश-प्रतिरोधकौषधानि, विशुद्धपेयजलं पशूनां कृते तृणचारादीनां च समुचिता व्यवस्था निश्चिता क्रियेत।

**प्रमादे सति दण्डनिश्चयः**
मन्त्री रत्नेशसदा अवदत् यत् सर्वकारस्य प्राधान्यं प्रत्येकस्मै प्लावनपीडितपरिवाराय समयोचित-साहाय्यप्रदानम् अस्ति। यदि कस्यापि प्रमादेन कोऽपि योग्यजनः साहाय्यात् वञ्चितः अभविष्यत्, तर्हि दोषिणाम् अधिकारिणां विरुद्धं कठोरं प्रशासनिकं पदं गृह्येत।

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये!

**काव्या-** नमस्ते नन्दिनि! प्रथमं विचित्रं वृत्तं श्रुतम्। बर्लिननगरे यन्त्रमेलायां विचित्राणि यन्त्राणि प्रदर्शितानि। यथा- मनोभाव-ज्ञापकः दीपः, श्वानानां चलभाषः, दन्तधावनकाष्ठे क्षुद्रदूरचित्रकं च।

**नन्दिनी-** सत्यम्! दन्तधावने अपि यन्त्रस्य आवश्यकता जाता! द्वितीयं वृत्तं तु अधिकं हास्यकरम्। दुबै-नगरे एकः अतिलघुः वासप्रकोष्ठः दृष्टः, यत्र शय्या भित्तीः स्पृशति, तस्य मासिकं भाटकं त्रिंशत्-सहस्र-रूप्यकाणि निर्धारितम्।

**काव्या-** आश्चर्यम्! तादृशे सङ्कुचिते स्थाने कथं जनैः सुप्तम्? तृतीयं वृत्तं तु विज्ञानात् आगतम्। पुरातत्त्वविद्भिः चतुर्भिः नेत्रैः युक्तः एकः प्राचीनः मत्स्यः अन्विष्टः, यस्य मूर्ध्न्यपि द्वे नेत्रे स्थिते।

**नन्दिनी-** अहो, उपरि आगच्छन्तः शत्रवः तेन मत्स्येन दृष्टाः स्युः! अन्तिमं वृत्तं तु भोजन-विषयकम्। क्षुधितः जनः भोजनस्य प्रेषकं प्रतीक्षितवान्, किन्तु भोजनवाहकेन मार्गे एव अपरिचितजनेभ्यः भोजनं विक्रीतं, तैश्च मार्गे खादितम्।

**काव्या-** अहो कष्टम्! तेन क्षुधितेन जनेन केवलं क्रोधः एव अनुभूतः स्यात्। अस्तु, अद्यतनानि विचित्र-वृत्तानि अत्रैव समाप्तानि। पुनः मिलामः, धन्यवादः!

**रविः खरिडेहालः - बेङ्गलूरु**

### "२०३० तमवर्ष पर्यन्तं विद्युत्कोषनिर्माय क्षेत्रे २० लक्ष-उद्योगावसराः"

२०३० तमे वर्षे विद्युत्कोष-निर्माण-कार्याणि १५ लक्षतः २० लक्षपर्यन्तं वर्धते इति अपेक्षा अस्ति । २५% प्रत्यक्षकार्यं शेषं परोक्षकार्यं च भविष्यति। नियुक्तिः वर्षे वर्षे २५% तः ३०% यावत् वर्धते। विद्युत्कोष-निर्माणयात्रा केवलं नीतेः एव नास्ति अपितु संयंत्रस्तरीय-क्षमतायाः विषये अपि अस्ति । पीएलआई-योजना अन्तरगतं ५० Gwh विद्युत्कोष-निर्माणस्य कृते सर्वकारेण १८,१०० कोटिरूप्यकाणि प्रतिबद्धाः । प्रायः १२००० कोटिरूप्यकाणां नवीन अवयव निर्माणप्रोत्साहनयोजना विचाराधीना अस्ति । विद्युत्कोष-निर्माणक्षमता सम्प्रति ६०Gwh अस्ति । २०२६ तमस्य वर्षस्य अन्ते यावत् १००Gwh भविष्यति । गुजरातहरियाणकर्नाटक, तेलंगाना इत्यादिषु राज्येषु विनिर्माणसंस्थानेषु निवेशेन सह पूर्णपारिस्थितिकी-तन्त्रस्य योजना अस्ति ।

# नमश्चण्डिकायै

दृक्पञ्चाङ्गेषु शुक्रास्तविषयेऽपि भारतीय-पारम्परिक- ज्योतिषस्यावमानं कुर्वद्भिः म्लेच्छविधानैः सटीकदहनकालस्य आधुनिक-खगोलीय- गणितसूत्राणां साहाय्येन शुक्रादीनामस्तत्वं निर्धार्य तस्मिन्नेव काले विवाहादीनि माङ्गलिककार्याणि निषिध्यन्ते। पश्यन्तु- यदि म्लेच्छविधानानुसारं शुक्रास्तस्य निर्धारणं क्रियते, तर्हि म्लेच्छविधानमेव सम्पूर्णतया स्वीकर्तव्यम्। म्लेच्छविधानानुसारं तु शुक्रास्तस्य विवाहादिमाङ्गलिककार्यनिषेधेन सह कश्चिदपि सम्बन्धो नास्ति। विवाहादिमाङ्गलिककार्याणां निषेधस्तु मार्गिणः शुक्रस्य सूर्याद् दशांशात् न्यूनान्तरे, तथा वक्रस्य शुक्रस्य सूर्याद् अष्टांशात् न्यूनान्तरे सति भवति। अस्य नियमस्य म्लेच्छविधाननिर्धारितेन सटीकदहनकालेन आधुनिकखगोलीयगणितसूत्रेण वा किञ्चिदपि सम्बन्धो नास्ति। अधुना वयं प्रसिद्धमेकम् आनलाईन- दृक्पञ्चाङ्गमवलोकितवन्तः। तत्र २०२६ तमवर्षस्य अक्तूबरमासस्य त्रयोदशे दिवसे शुक्रास्तः प्रदर्शितः। तस्मिन्नेव समये तस्य पञ्चाङ्गस्य गणनानुसारं सूर्यस्य स्पष्टांशः २५°५७′ कन्याराशौ तथा शुक्रस्य स्पष्टांशः १२°१२′ तुलाराशौ वर्तते। अनयोर्ग्रहयोर्मध्ये प्रायः १६°१५′ अन्तरमस्ति। कथं वा षोडशांशाधिकेऽन्तरे शुक्रास्तः स्वीक्रियते? कस्य ग्रन्थस्य प्रमाणेन अयं शुक्रास्तः निर्धारितः? आधुनिक-खगोलीय- गणितसूत्रेण निर्धारितः सटीकदहनकालः धार्मिकेषु माङ्गलिकेषु च कार्येषु ग्राह्यो निश्चयेन न भवति। दृक्सिद्धान्तवादिभिः सम्पूर्णस्य सिद्धान्तज्योतिषस्य म्लेच्छीकरणं कृतमिव दृश्यते, यच्च सर्वथा अनुचितम्। अस्य म्लेच्छज्योतिषदूषितस्य व्रतपर्वादिगणितस्य ग्रहणेन माङ्गल्यस्य सम्भावना न विद्यते। अस्माकं ज्योतिषग्रन्थेषु पुराणेषु च ग्रहाणां फलानि, तिथयः, पर्वाणि च ये निर्दिष्टानि, तानि पारम्परिकेन सूर्यसिद्धान्तीयगणितेनैव निर्धारितानि, न तु म्लेच्छ- सटीक-दहनकालादिभिराधुनिकखगोलीयगणना-पद्धतिभिः। अतः तादृशं गणितं स्वीकृत्य तस्यैव आधारेण धार्मिककृत्यानां निर्णयः करणीय इति मन्यते चेत्, तत् नितरां विचारहीनं भवति। गणितपद्धतेः सूक्ष्मता एव तस्य धार्मिकप्रामाण्यं न भवति। शास्त्रेण यस्य प्रयोजनस्य कृते या गणनापद्धतिः स्वीकृता, तस्यैव प्रयोजनस्य कृते तस्या उपयोजनं करणीयम्। अवस्था एषा प्रायः सम्पूर्णेष्वपि उत्तराखण्डप्रदेशस्य दृक्पञ्चाङ्गेषु दृश्यते। तत्र कुत्रचित् म्लेच्छानां वेधशालाभ्यः प्राप्तं सर्वमेतद्गणितं गृहीत्वा पञ्चाङ्गेषु प्रकाशितं दृश्यते। एवं मनमानेन प्रकारेण शुक्रास्तादीनां निर्धारणं नितान्तं निन्दनीयम्। विष्णुधर्मोत्तरस्यापि स्पष्टं वचनमस्ति-

**यन्त्रवेधादिना ज्ञातं यद् बीजं गणकैस्ततः।**
**ग्रहणादिपरीक्षेत न तिथ्यादिकदाचन॥**


यन्त्रवेधादिभिः गणकैः यद् बीजं बीजसंस्कारश्च ज्ञायते, तेन ग्रहणादीनां परीक्षा कर्तव्या; किन्तु तेन तिथ्यादीनां निर्णयः कदाचनापि न करणीयः। उपर्युक्तं वचनमस्मिन् विषयेऽत्यन्तं महत्त्वपूर्णं मार्गदर्शनं प्रददाति। अत्र स्पष्टतया प्रतिपादितं यत् यन्त्रवेधादिभिः प्राप्तस्य बीजस्य अथवा बीजसंस्कारस्य उपयोगो ग्रहणादिपरीक्षणे कर्तुं शक्यते, किन्तु तिथ्यादिनिर्णये तस्य प्रयोगः न करणीयः। अतः प्रत्यक्षवेधेन अथवा आधुनिक-खगोलीय- गणनया प्राप्तं फलितं धार्मिकतिथेः पर्वनिर्णयस्य च प्रमाणमिति उभयोः प्रयोजनयोरेकत्वं मन्यते चेत्, तत् शास्त्रीयदृष्ट्या समीचीनं न भवति। अस्यैव विषयस्य निर्णयग्रन्थेष्वपि दृष्टादृष्टफलयोर्भेदेन स्पष्टीकरणं कृतम् यत्-

अदृष्टफलसिद्ध्यर्थं यथार्कगणितं कुरु।
गणितं यदिदृष्ट्यर्थं तद्दृष्ट्युद्भवतः सदा॥

अर्थात् अदृष्टफलस्य सिद्ध्यर्थम् अर्कगणितानुसारं गणना कर्तव्या, तथा या गणना दृष्टफलस्य कृते भवति, सा सदा दृग्गणितजन्यगणनानुसारमेव भवेत्। अनेन वचनेन गणनायाः द्वयोः प्रयोजनयोः स्पष्टो विभागः प्रदर्शितः। धार्मिकव्रतानि, पर्वाणि, उपवासादयश्च येषामदृष्टफलरूपेण शास्त्रसम्मतं फलमभिमतं, तेषां निर्णये पारम्परिकस्य अर्कगणितस्य विचारः अपेक्षितः। याः खगोलीयघटनाः प्रत्यक्षतया दृश्यन्ते, तासां निर्धारणे तु दृग्गणितस्य प्रयोगः कर्तुं शक्यते। अतः इदं ज्ञातव्यम् यत् आधुनिक- खगोलीय-गणनायाः सूक्ष्मता तथा तस्याः धार्मिकनिर्णये प्रामाणिकत्वम्- एतयोः द्वयोः भेदोऽस्ति। आधुनिकं खगोलीयगणितं ग्रहस्य प्रत्यक्षस्थितिं सूक्ष्मतया निर्धारयितुं समर्थं भवेत्, किन्तु तेन प्राप्तं फलितं धार्मिककर्मणां कृते स्वतः प्रमाणमिति स्वीकर्तुं न शक्यते। शास्त्रेण यस्य प्रयोजनस्य कृते या गणनापद्धतिः स्वीकृता, तस्यैव प्रयोजनस्य कृते तस्या उपयोजनं करणीयम्। विवाहादि-माङ्गलिक- कर्मणामपि विषये शास्त्रीयनियमाः सम्यग्विचारणीयाः। शुक्रस्य गुरोश्च अस्तत्वं, मार्गित्वं, वक्रत्वं, सूर्येण सह तयोः अन्तरं च यथाशास्त्रं परम्परागतज्योतिषग्रन्थेषु निर्दिष्टानि। अतः माङ्गलिककर्मणां निषेधः अथवा अनुष्ठानं तेषामेव नियमाणामाधारेण निर्णेयम्। केवलम् आधुनिक- खगोलीय- गणनासूत्रेण प्राप्तं सटीकदहनकालं स्वीकृत्य तस्मिन्नेव क्षणे धार्मिकदृष्ट्या शुक्रास्तः प्रारब्ध इति मन्यते, ततश्च विवाहादिमाङ्गलिककर्माणि निषिद्धानीति निष्कर्षः क्रियते चेत्, तस्य निष्कर्षस्य कृते स्वतन्त्रं शास्त्रीयप्रमाणमपेक्षितम्।

**सूर्यसिद्धान्तीयपञ्चाङ्गस्य आवश्यकता-**

यथाविदितं संवत्सरे २०८४, दुर्मतिनामसंवत्सरे, तन्त्रकुलस्य सूर्यसिद्धान्तीयं पञ्चाङ्गं प्रकाशितं भवति। तस्यैव पञ्चाङ्गस्य अन्तर्गतं २०८४ दुर्मतिसंवत्सरस्य प्रथमदृष्ट्या व्रतोपवास-पर्वोत्सवादीनां सूर्यसिद्धान्तीय- गणिताधारितं सारणीपत्रं निर्मितमस्ति। अस्माभिः एषा सारणी सर्वेभ्यः पञ्चाङ्गकारेभ्यः प्रेष्यते। तत्र कस्यचिदपि विरोधाभासस्य आपत्तेर्वा दर्शनं भवति चेत्, तर्हि ते अस्मान् सूचयेयुः। तद्विषये विद्वद्भिः सह सम्यग् विचारविमर्शः करिष्यते। एतत्सारणीपत्रं प्रेष्यते यतः व्रतपर्वोपवासोत्सवादिषु ऐक्यमवस्थितं भवेत् तथा च यत्र कुत्रचित् विरोधाभासो विद्यते, तस्य निवारणं पञ्चाङ्गप्रकाशनात् पूर्वमेव सम्भवेत्।




## सूर्यसिद्धान्तात् पर्वादीनि किमर्थं गृहीतानि? दृग्गणितात् न किमर्थम्?

सूर्यसिद्धान्तीयगणना उत्तराखण्डप्रदेशस्य पारम्परिकगणनापद्धतिः अस्ति। यत्र तिथिपरिवर्तनं न भवति, तादृशेषु व्रतेषु, पर्वसु, उत्सवेषु च बीजसंस्काररहितायाः शुद्धायाः सूर्यसिद्धान्तीयतिथेः ग्रहणस्य परम्परा प्रचलिता अस्ति। स्वामी करपात्रीजीमहाराजः, शाङ्करमठश्च अस्याः परम्परायाः समर्थकौ आस्ताम्। अत्र पुनः विष्णुधर्मोत्तरस्य तत् स्पष्टं वचनं स्मरणीयम्-

**यन्त्रवेधादिना ज्ञातं यद् बीजं गणकैस्ततः।**
**ग्रहणादिपरीक्षेत न तिथ्यादिकदाचन॥**

यन्त्रवेधादिभिः गणकैः प्राप्तं बीजं वा बीजसंस्कारं ग्रहणादीनां परीक्षणे योजयेत्, किन्तु तेन तिथ्यादीनां निर्णयः कदाचनापि न कुर्यात्। अतः तिथेः निर्णयः सर्वदा बीजसंस्काररहितेन शुद्धेन सूर्यसिद्धान्तीयगणितेनैव करणीयः। येषां निर्णयसिन्ध्वादीनां ग्रन्थानां साहाय्येन वयं सम्प्रति पर्वादीनां निर्णयं कुर्मः, तेऽपि स्पष्टतया वदन्ति-

**अदृष्टफलसिद्ध्यर्थं यथार्कगणितं कुरु।**
**गणितं यदिदृष्ट्यर्थं तद्दृष्ट्युद्भवतः सदा॥**

अदृष्टफलस्य सिद्ध्यर्थं सूर्यगणितानुसारं गणना कर्तव्या तथा दृष्टफलस्य कृते दृग्गणितजन्यगणना सदा ग्राह्या। अदृष्टफलमर्थात् धार्मिकफलं, व्रतपर्वादिफलं च यत्र अभिप्रेतं भवति, तत्र यथार्कगणितं सूर्यसिद्धान्तीयगणनैव ग्राह्या; दृष्टफलमर्थात् प्रत्यक्षतया दृश्यमानायाः घटनायाः निर्धारणं तु दृग्गणितेन कर्तव्यम्। एष एव सम्पूर्णस्य विषयस्य मूलमन्त्रः। विवाहे, संस्कारेषु, यात्रायां, ग्रहणे, जातके, नैमित्तिककर्मसु च बीजसंस्कारिताः स्फुटग्रहाः स्वीक्रियन्ते। अतः प्रत्येकस्मिन् विषये गणितपद्धतेः प्रयोगः तस्य शास्त्रीयप्रयोजनमनुसृत्य एव विचारणीयः। एकस्याः गणनापद्धतेः अन्यस्मिन् क्षेत्रे अविचारितरूपेण आरोपणमेव मूलसमस्यां जनयति।

**पञ्चाङ्गकारेभ्यः अपेक्षा-** अस्य विषयस्य प्रयोजनं न कस्यचिद् व्यक्तेः, संस्थायाः अथवा पञ्चाङ्गकारस्य व्यक्तिगतविरोधः। क्रमशः...

# कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालये

## २१- दिवसीय- ज्योतिर्विज्ञान- कार्यक्रमस्य शुभारम्भः



**हिमसंस्कृतवार्ताः- डॉ रेणुका बोकारे, नागपुरम्।** कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयस्य, रामटेकस्य, वेदाङ्ग- ज्योतिष- विभागेन विश्वविद्यालयपरिसरे २१- दिवसीय- ज्योतिर्विज्ञानकार्यक्रमस्य शुभारम्भः कृतः। अस्य कार्यक्रमस्य उद्देश्यं विद्यार्थिभ्यः वेदाङ्ग-ज्योतिषस्य मूलभूतसंकल्पनानां, तस्य विभिन्नप्रयोगाणां तथा भारतीय-कालगणनापद्धतेः महत्त्वस्य परिचयं प्रदातुम् अस्ति। कार्यक्रमस्य संयोजकः प्रो. प्रसाद गोखले स्वस्य प्रस्ताविक-वक्तव्ये २१ दिवसीय- कार्यक्रमस्य उद्देश्यानां, स्वरूपस्य तथा नियोजित- गतिविधीनां च विषये सूचनां दत्तवान्। तेन कथितं यत् अस्य कार्यक्रमस्य कृते कुलं ५७ विद्यार्थिभिः पञ्जीकरणं कृतम् अस्ति, यत् ज्योतिर्विज्ञानस्य तथा भारतीयज्ञानपरम्परायाः प्रति विद्यार्थिषु वर्धमानां रुचिं प्रदर्शयति। माननीयः कुलगुरुः डॉ. अतुल वैद्यः कार्यक्रमस्य आयोजकेभ्यः तथा प्रतिभागिभ्यः विद्यार्थिभ्यश्च शुभकामनाः अभिनन्दनं च प्रदत्तवान्। दिल्लीविश्वविद्यालयस्य ज्योतिर्विज्ञान- विषयस्य प्राध्यापकः प्रो. उमाशङ्करः उद्घाटनपरकं सम्बोधनं कृतवान्। वेदाङ्ग- ज्योतिषस्य संकल्पनायाः, तस्य विभिन्नप्रयोगाणां च विषये प्रकाशं कुर्वन् तेन भारतीयज्ञानपरम्परायां वेदाङ्ग- ज्योतिषस्य महत्त्वं रेखाङ्कितम्। तेन विशेषरूपेण भारतीयकालगणनापद्धतेः, समकालीनसन्दर्भे च तस्याः प्रासङ्गिकतायाः विषये विस्तरेण स्पष्टीकरणं प्रदत्तम्। उद्घाटनसत्रस्य अध्यक्षता प्रो. ललिता चन्द्रात्रे, अधिष्ठाता, शिक्षासङ्कायः, के.के.एस.यू. इत्यनया कृता। स्वकीय-अध्यक्षीयसम्बोधने तया आधुनिकयुगे ज्योतिर्विज्ञानस्य महत्त्वं प्रासङ्गिकता च स्पष्टिता। भारतीय- पारम्परिक- ज्ञानप्रणालीः समकालीन- शैक्षिकदृष्टिकोणेन अवगन्तुं, संरक्षितुम् अग्रे वर्धयितुं च आवश्यकतायाः विषये बलं प्रदत्तम्। उद्घाटनसत्रे प्रो. हरेकृष्ण अगस्ती, प्रो. कलापिनी अगस्ती, प्रो. परागजोशी च उपस्थिताः आसन्। तेभ्यः २१- दिवसीय- ज्योतिर्विज्ञान- कार्यक्रमस्य सफलायोजनाय शुभकामनाः प्रदत्ताः। अनुजशर्मावर्यः उद्घाटन- कार्यक्रमस्य सञ्चालनं कृतवान्, यद्यपि डॉ. हृषीकेश साहू धन्यवादज्ञापनं कृतवान्। अनेन २१- दिवसीय- ज्योतिर्विज्ञान- कार्यक्रमेन प्रतिभागिनां विद्यार्थिनां ज्योतिर्विज्ञानस्य विभिन्नायामानां तथा तस्य प्रयोगाणां व्यवस्थिताध्ययनस्य अवसरः प्राप्स्यते। तद्वत् भारतीयज्ञानपरम्परायां ज्योतिर्विज्ञानस्य स्थानस्य तथा समकालीनसमाजे तस्य प्रासङ्गिकतायाः अध्ययनमपि अनेन कार्यक्रमेण क्रियते।

# रायगञ्ज विश्वविद्यालयस्य संस्कृतविभागस्य

## व्याकरणशास्त्रे, विभिन्नशास्त्रे पारङ्गतप्राध्यापकः

### *प्रशान्तकुमारमहला विद्यासागर- शिक्षासम्मानेन अलङ्कृतः*



**हिमसंस्कृतवार्ताः- मालदा, पश्चिमबङ्गः**

शिक्षकदिवसमुपलक्ष्य पश्चिमवङ्गसर्वकारस्य विद्यालयीयशिक्षा- उच्चशिक्षाविभागयोः संयुक्ताश्रयेण न्यू-टाउनस्थे 'कन्वेन्शन सेण्टर 'नामके सभासदनके आयोजिते विशिष्टसमारोहे पश्चिमबङ्गीयविदुषां शिक्षकाणां सादरं सम्मानज्ञापनम् अभूत्। अस्मिन्नेव कार्यक्रमे राय- गञ्जविश्वविद्यालयस्य संस्कृतविभागस्य भूतपूर्व- विभागाध्यक्षः, साम्प्रतं IQAC (आई. क्यू.ए.सी.) इत्यस्य निदेशकश्च प्रो. प्रशान्तकुमार- महलामहोदयः सर्वकारपक्षतः 'विद्यासागर- शिक्षा- सम्मानम् २०२६' इति पुरस्कारेण समलङ्कृतः। प्राध्यापकः माहलावर्यः विगतद्वादश- काधिककालाद् आरभ्य रायगञ्जविश्वविद्यालयस्य शिक्षण अनुसन्धान- प्रशासनिकक्षेत्रेषु निरन्तरं महत्त्वपूर्णं योगदानं कुर्वन्नस्ति। जन्मना ओड़िशानिवासी सन्नपि स विगत- एकविंशतिवर्षेभ्यः रायगञ्जविश्वविद्यालयेन सह आत्मीयतया सम्बद्धो वर्तते। अस्मिन् सुदीर्घ कर्मजीवने तेन विश्वविद्यालयस्य विविधेषु गुरुतरदायित्वपूर्णपदेषु कार्यं कृतम्, शिक्षासंशोधनक्षेत्रयोश्च स्वकीयं विशिष्टं स्थानं स्थापितम्। संस्कृतभाषां शास्त्रचर्चां च प्रति प्राध्यापकस्यास्य अगाधः अनुरागः सर्वजन- विदितः। यद्यपि स मूलतः वैयाकरणः, तथापि संस्कृतस्य इतरशास्त्रेष्वपि तस्य गम्भीरं पाण्डित्यं सर्वथोल्लेखनीयं वरिवर्ति। व्याकरण- साहित्य- दर्शनादि- विविधासु शास्त्रीयप्रणालीषु तस्य ज्ञानं शोधोन्मुखि प्रवर्तते। शास्त्रान्तरेषु तस्य क्रियाशीलता तं प्रसिद्धं संस्कृतविद्वांसं कल्पयति। अध्यापनेन अनुसन्धानेन च सहैव विश्वविद्यालयस्य प्रशासनिककार्याणां सञ्चालनेऽपि तस्य नैपुण्यं श्लाघनीयं वर्तते। IQAC-इत्यस्य निदेशकपदमलङ्कुर्वता तेन विश्वविद्यालयीय- शिक्षायाः गुणात्मकतायाः, शैक्षणिकसंरचनायाः, गुणवत्तासंवर्धनादिकार्यक्रमाणां च विकासे विशिष्टा भूमिका निर्वाह्यते। तस्य दीर्घकालीनाध्यापनस्य, शोधस्य, संस्कृतसेवाप्रवृत्तेः, विश्वविद्यालयस्य च सर्वाङ्गीणविकासे तस्य महत्त्वपूर्णयोगदानस्य आदरं कर्तुमिव इदं सम्मानं तस्मै प्रदत्तम् इति मन्यते। 'विद्यासागर-शिक्षा-सम्मानम् २०२६ इति प्रदानेन प्राध्यापकस्य प्रशान्तकुमारमहलायाः सुदीर्घ- शैक्षणिकजीवनस्य यथार्था प्रतिष्ठा अभवदिति आशयः। २०२६ तमवर्षे संस्कृतस्य पुरस्कारप्रापकः समयः तथा इति संस्कृतमातुः सेवकानां कृते महान् हर्षस्य विषयः च इति।

### शुक्रास्तनिर्णये शास्त्रीयमर्यादाः दृग्गणितं सूर्यसिद्धान्तश्च

उद्देश्यं केवलमेतत् यत् अस्माकं पारम्परिक- पञ्चाङ्गव्यवस्थायां ये मतभेदाः उत्पन्नाः, तेषां शास्त्रीयगणितीयाधारेण परीक्षणं भवेत्। यदि कस्यचिद् व्रतस्य, पर्वणः, उपवासस्य अथवा उत्सवस्य विषये प्रस्तुतायां सूर्यसिद्धान्तीयसारण्यां काचित् तिथिः विस्मृता भवेत् अथवा कस्याश्चित् तिथेः विषये विरोधाभासः दृश्येत, तर्हि तद्विषये सूचनं करणीयम्। येन पञ्चाङ्गस्य प्रकाशनात् पूर्वं तस्मिन् विषये विदुषां मध्ये सम्यक् चर्चा भवितुं शक्नुयात्। व्रतपर्वादीनां निर्णये ऐक्यं केवलं सुविधायाः विषयः नास्ति। कोटिशः श्रद्धालवः पञ्चाङ्गमवलम्ब्य स्वकीयानां धार्मिककृत्यानां निर्धारणं कुर्वन्ति। अतः पञ्चाङ्गकाराणाम् एतद् उत्तरदायित्वं यत् गणितपद्धतेः, शास्त्रीयप्रमाणस्य, धार्मिकप्रयोजनस्य च सम्यग् समन्वयं कृत्वा निर्णयः प्रदीयेत। आधुनिकवेधः तथा आधुनिकगणितं स्वस्थान एव उपयोगिनौ स्तः, किन्तु तौ भारतीयस्य सिद्धान्तज्योतिषस्य सम्पूर्णपरम्परायाः विकल्पौ इति स्वीकर्तुं न युक्तम्। यथा शास्त्रे दृष्टफलस्य अदृष्टफलस्य च भेदः प्रतिपादितः, तथैव गणनायाः प्रयोगस्यापि मर्यादा निर्धारितास्ति। आवश्यकता एतावती एव यत् वयं तां मर्यादां सम्यगवगच्छेम तथा तदनुसारमेव पञ्चाङ्गनिर्माणं कुर्याम। अतः संवत् २०८४ दुर्मतिनामसंवत्सरस्य सूर्यसिद्धान्तीय- पर्वसारणी एतदर्थमेव विद्वज्जनानां समक्षं प्रस्तुत्यते यत् सर्वे पञ्चाङ्गकाराः तस्याः परीक्षणं कुर्वन्तु, यत्र मतभेदो विद्यते तत्र शास्त्रीयप्रमाणैः सह विचारविमर्शः क्रियताम्, पञ्चाङ्गस्य प्रकाशनात् पूर्वं च सम्भवमात्रं तेषां विरोधाभासानां निवारणं क्रियताम्। अनेन व्रतेषु, पर्वसु, उपवासेषु, धार्मिककृत्येषु च अधिकतमम् ऐक्यं स्थापयितुं शक्यते, अस्माकं पारम्परिकी ज्योतिषीय- गणनापद्धतिः चापि स्वनिर्धारिते स्वरूपे सुरक्षितं भवितुमर्हति।








# विनोबा -भावे -विश्वविद्यालयस्य संस्कृतविभागे विशिष्टव्याख्यानमालाया उद्घाटनं जातम्

**हिमसंस्कृतवार्ता, डॉ सुबोधकुमारसाहूः, हजारीबाग।** षड्विंशत्यधिकद्विसहस्रतमकृष्टाब्दस्य नवममासस्याष्टमे दिनाङ्के विनोबाभावे-विश्वविद्यालयस्य तुलसीसभागारे स्नातकोत्तर-संस्कृतविभागेन पञ्चदिवसीय-व्याख्यानमालाया उद्घाटनमक्रियत। अस्मिन्नुद्धाटनसत्रे राजस्थान-राज्यस्य कोटानगरवासी डॉ घनश्यामचन्द्रोपाध्याय मुख्यवक्तृरूपेण उपस्थित आसीत्। दीपप्रज्वालनेन तथा च सरस्वतीमातुश्चित्रे पुष्पसमर्पणेन माल्यार्पणेन च सत्रस्य प्रारम्भोऽभवत्। प्रिन्सो विद्यासागर इत्यादयो विद्यार्थिनः स्वस्तिवाचन-मकुर्वन्। तृप्तिः सोनाक्षी नेहा ज्योतिरित्यादयश्छात्राः स्वागतगीतमगायन्। आर्षकन्यागुरुकुलस्य छात्रा वैदिकमन्त्रोच्चारण-मकुर्वन्। अस्मिन्सत्रे डॉ ०ताराकान्तशुक्लः ,डॉ०अखिलेश्वरपाठकः, डॉ सुधीरकुमारतिवारी डॉ शिवगीतसिंह ,डॉ सुबोधकुमार साहूः, डॉ सुनीलकुमारदुबे ,पुरुषोत्तमकुमारसिंहः, पाण्डेय-शन्तनुशङ्कर इत्यादयः प्राध्यापकाः शिक्षकाश्च उपस्थिता आसन्। डॉ नकुलपाण्डेयो विषयप्रवेशं कुर्वन्नवदद्यत् डॉ घनश्यामचन्द्रोपाध्याय एकादशविषयेषु स्नातकोत्तरोपाधिमर्जयत्तथा च द्विवारं विद्यावारिध्युपाधिमलभत। इदानीं स तृतीयवारं विद्यावारिध्युपाध्यर्थं शोधं करोति तथा च विद्यावाचस्पत्युपाध्यर्थमपि स्वप्रबन्धं समर्प्य कार्यमसमापयत्। अस्यां व्याख्यानमालायां पुराणं दुर्गासप्तशती चण्डीशतकमायुर्वेदो ज्योतिषं पाण्डुलिपय इत्यादिषु विषयेषु व्याख्यानानि भविष्यन्ति। मानविकीसंकायाध्यक्ष एस्०जेड्०डो० हग्विभागाध्यक्षा डॉ अञ्जुमारा ,आर्ष-कन्यागुरुकुलस्य निदेशक आचार्यकौटिल्यश्च स्वविचारान्प्राकटयन्। मुख्यवक्ता डॉ घनश्याम-चन्द्रोपाध्याय बौद्धिकसम्पदायां प्रतिलिप्यधिकार इति विषये प्रथमं व्याख्यानमकरोत्तथा च सांस्कृतिकधरोहरसंरक्षणे आदिवासीसमाजस्य भूमिकेति विषये द्वितीयं व्याख्यानमकरोत्। सोऽवदद्यद्यस्या निस्तारणं कर्तुं शक्यते सा सम्पदास्ति। ज्ञानं बुद्धिजन्यमनुभवजन्यं चेति द्विधा भवति यत्रानुभवजन्यं ज्ञानमेव प्रधानं वर्तते। यथोक्तं भगवद्गीतायां चतुर्थेऽध्याये अष्टात्रिंशे श्लोके न हि ज्ञानेन सदृशं पवित्रमिह विद्यत इति। स्वानुभवेनोत्पन्नाया ज्ञानरूपसम्पदायाः प्रकाशनं कृत्वा प्रतिलिप्यधिकारः प्राप्यते। कश्चिदप्यन्यो जनोऽनुमतिं विना प्रतिलिप्यधिकारयुक्ताया बौद्धिकसम्पदाया अनुकरणं कर्तुं न शक्नोति। अस्मिन्कार्यक्रमे स्नातकोत्तरसंस्कृतविभागस्य विद्यार्थिनः शोधार्थिनः पूर्वछात्राः सन्तकोलम्बामहाविद्यालयस्य मार्खममहा-विद्यालयस्य के०बी०महिलामहाविद्यालयस्य च संस्कृतविभागानां विद्यार्थिन आर्षकन्यागुरुकुलस्य छात्राश्च उपस्थिता आसन्। डॉ सुबोधकुमारसाहूः धन्यवादज्ञापनमकरोत्। कुमारीमनीषोद्धाटनसत्रे मञ्चसञ्चालनमकरोत्। ज्ञातव्यं यदेतादृशमेव षड्विंशत्यधिकद्विसहस्रतमकृष्टाब्दस्य नवममासस्य नवमदिनाङ्कतो द्वादशदिनाङ्कपर्यन्तं प्रतिदिनं द्वे व्याख्याने भविष्यतः। बुधवासरे प्रथमव्याख्यानस्य विषयः श्रीमद्भागवतस्य स्वरूपगताध्ययनमिति भविष्यति तथा च द्वितीयव्याख्यानस्य विषयो भारतीयसंस्कृत्याधारिता दिनचर्या विद्यार्थिजीवने समस्याश्चेति भविष्यति



## "संस्कृतकथामञ्जरी" {१५}

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

### "अथ राक्षसबद्धो नाम नवमोपाख्यानम्" (२)

अथ तेन सह राजा काञ्चीनगरमागत्य कौतुकान्वितः नरमोहिनीगृहं गत्वा, तस्या रूपं दृष्ट्वा विस्मयं प्राप्तः। तया च पादप्रक्षालनाभ्यङ्गसुगन्धिपुष्पादिना सम्भावितः उक्तच- भो राजन्! अद्य अहं धन्या जाताऽस्मि, मम गृहञ्च श्लाघ्यमभूत भवच्चरणप्रसादेन। ततः सा तस्मै वीटिकां दत्तवती। राजाऽपि तां गृहीत्वा तया सह मधुरैरनिन्दिताऽऽलापैः कियन्तं कालमति-वाहितवान् ततः सा राजानं सविनयमभाषत- भो राजन्! स्थानमिदं नापच्छून्यम्; अत्र मदन्यः यः कश्चित् रात्रौ स्वपिति, उषसि स गतप्राणः परिलक्ष्यते, तत्प्रतिविधातुं भवते निवेदितम्। अत्र यदुचितं तत् सम्पाद्यताम् इति उक्त्वा विरराम। ततः प्राग्विदितवृत्तान्तः राजा अभयदानपुरःसरम् अवोचत्- त्वमधुना सुखं निद्रामाश्रय, तत्प्रतिकारार्थं यथोचितं यतिष्ये इति। एवं रात्रेरतिक्रान्ते प्रथमप्रहरे नरमोहिनी निद्रां गता; द्वितीयप्रहरावसाने घोरदर्शनः करालदर्शनः नरशोणितलोलुपो राक्षसो विकटाऽऽरावेण यावत् तत्र समायातः, सजागरः निर्भिकचेताः राजा तं युद्धावकाशमदत्वा निशितकरबालेन तत्क्षणादेव निजघान। तत्पतनशब्देन सा नरमोहिनी व्यपगतनिद्रा, हतं राक्षसं दृष्ट्वा सप्रश्रयं राजानं भणति- भो राजन्! यन्मादृशेषु अकिञ्चनजनेषु भवादृशः सम्यगनुकम्पते नाम, तत्केवलं निशाकरकिरणानामिव महतां श्रेष्ठनीचजनेषु समवृत्तितैव भवत्प्रसादात् अहं निर्भया जाताः; अद्यप्रभृति मे राक्षसोपद्रवो गतः। त्वत्कृतोपकारात् कथमहमुत्तीर्णा भवामि? राज्ञा तु बहुप्राणिनां प्राणविनाशिनं दुराचारं निशाचरं हत्वा मया प्रतिपालितः स्वकीयो धर्म्मः तेनैव सञ्जातः मे महान् परितोषः; नास्ति मे करणीयम् अत्र किमपि इत्युक्त्वा कमलाकरेण सह उज्जयिनीं प्रति प्रतस्थे। इमां कथां कथयित्वा पुत्तलिका भोजराजमवादीत्- भो राजन्! त्वयि एवं धैर्य्यशौर्य्यौदार्य्यादिकं विद्यते चेत्, तर्ह्यस्मिन् सिंहासने समुपविश। राजा तूष्णीमासीत्।

